**Mahābhārata III.280**

२८०

मार्कण्डेय उवाच

ततः काले बहुतिथे व्यतिक्रान्ते कदाचन ।

प्राप्तः स कालो मर्थव्यं यत्र सत्यवता नृप ।।१।।

गणयन्त्याश्च सावित्र्या दिवसे दिवसे गते ।

तद्वाक्यं नारदेनोक्तं वर्तते हृदि नित्यशः ।।२।।

चतुर्थेऽहनि मर्थव्यमिति सञ्चिन्त्य भामिनी ।

व्रतं त्रिरात्रमुद्दिश्य दिवारात्रं स्थिताभवत् ।।३।।

तं श्रुत्वा नियमं दुःखं वध्वा दुःखान्वितो नृपः ।

उत्थाय वाक्यं सावित्रीमब्रवीत्परिसान्त्वयन् ।।४।।

अतितीव्रोऽयमारम्भस्त्वयारब्धो नृपात्मजे ।

तिसृणां वसतीनां हि स्थानं परमदुष्करम् ।।५।।

सावित्र्युवाच

न कार्यस्तात सन्तापः पारयिष्याम्यहं व्रतम् ।

व्यवसायकृतं हीदं व्यवसायश्च कारणम् ।।६।।

द्युमत्सेन उवाच

व्रतं भिन्धीति वक्तुं त्वां नास्मि शक्तः कथं चन ।

पारयस्वेति वचनं युक्तमस्मद्विधो वदेत् ।।७।।

मार्कण्डेय उवाच

एवमुक्त्वा द्युमत्सेनो विरराम महामनाः ।

तिष्ठन्ती चापि सावित्री काष्ठभूतेव लक्ष्यते ।।८।।

श्वोभूते भर्तृमरणे सावित्र्या भरतर्षभ ।

दुःखान्वितायास्तिष्ठन्त्याः सा रात्रिर्व्यत्यवर्तत ।।९।।

अद्य तद्दिवसं चेति हुत्वा दीप्तं हुताशनम् ।

युगमात्रोदिते सूर्ये कृत्वा पौर्वाह्णिकाः क्रियाः ।।१०।।

ततः सर्वान्द्विजान्वृद्धाञ्श्वश्रूं श्वशुरमेव च ।

अभिवाद्यानुपूर्व्येण प्राञ्जलिर्नियता स्थिता ।।११।।

अवैधव्याशिषस्ते तु सावित्र्यर्थं हिताः शुभाः ।

ऊचुस्तपस्विनः सर्वे तपोवननिवासिनः ।।१२।।

एवमस्त्विति सावित्री ध्यानयोगपरायणा ।

मनसा ता गिरः सर्वाः प्रत्यगृह्णात्तपस्विनाम् ।।१३।।

तं कालं चमुहूर्तं च प्रतीक्षन्ती नृपात्मजा ।

यथोक्तं नारद वचो चिन्तयन्ती सुदुःखिता ।।१४।।

ततस्तु श्वश्रूश्वशुरावूचतुस्तां नृपात्मजाम् ।

एकान्तस्थमिदं वाक्यं प्रीत्या भरतसत्तम ।।१५।।

श्वशुरावूचतुः

व्रतो यथोपदिष्टोऽयं यथावत्पारितस्त्वया ।

आहारकालः सम्प्राप्तः क्रियतां यदनन्तरम् ।।१६।।

सावित्र्युवाच

अस्तं गते मयादित्ये भोक्तव्यं कृतकामया ।

एष मे हृदि सङ्कल्पः समयश्च कृतो मया ॥१७॥

मार्कण्डेय उवाच

एवं सम्भाषमाणायाः सावित्र्या भोजनं प्रति ।

स्कन्धे परशुमादाय सत्यवान्प्रस्थितो वनम् ॥१८॥

सावित्री त्वाह भर्तारं नैकस्त्वं गन्तुमर्हसि ।

सह त्वयागमिष्यामि न हि त्वां हातुमुत्सहे ॥१९॥

सत्यवानुवाच

वनं न गतपूर्वं ते दुःखः पन्थाश्च भामिनि ।

व्रतोपवासक्षामा च कथं पद्भ्यां गमिष्यसि ॥२०॥

सावित्र्युवाच

उपवासान्न मे ग्लानिर्नास्ति चापि परिश्रमः ।

गमने च कृतोत्साहां प्रतिषेद्धुं न मार्हसि ॥२१॥

सत्यवानुवाच

यदि ते गमनोत्साहः करिष्यामि तव प्रियम् ।

मम त्वामन्त्रय गुरून्न मां दोषः स्पृशेदयम् ॥२२॥

मार्कण्डेय उवाच

साऽभिगम्याब्रवीच्छ्वश्रूं श्वशुरं च महाव्रता ।

अयं गच्छति मे भर्ता फलाहारो महावनम् ॥२३॥

इच्छेयमभ्यनुज्ञातुमार्यया श्वशुरेण च ।

अनेन सह निर्गन्तुं न हि मे विरहः क्षमः ॥२४॥

गुर्वग्निहोत्रार्थं कृते प्रस्थितश्च सुतस्तव ।

न निवार्यो निवार्यः स्यादन्यथा प्रस्थितो वनम् ॥२५॥

संवत्सरः किंचिदूनो न निष्क्रान्ताहमाश्रमात् ।

वनं कुसुमितं द्रष्टुं परं कौतूहलं हि मे ॥२६॥

द्युमत्सेन उवाच

यतःप्रभृति सावित्री पित्रा दत्ता स्नुषा मम ।

नानयाभ्यर्थनायुक्तमुक्तपूर्वं स्मराम्यहम् ॥२७॥

तदेषा लभतां कामं यथाभिलषितं वधूः ।

अप्रमादश्च कर्थव्यः पुत्रि सत्यवतः पथि ॥२८॥

मार्कण्डेय उवाच

उभाभ्यामभ्यनुज्ञाता सा जगाम यशस्विनी ।

सह भर्त्रा हसन्तीव हृदयेन विदूयता ॥२९॥

सा वनानि विचित्राणि रमणीयानि सर्वशः ।

मयूररवघुष्टानि ददर्श विपुलेक्षणा ॥३०॥

नदीः पुण्यवहाश्चैव पुष्पितांश्च नगोत्तमान् ।

सत्यवानाह पश्येति सावित्रीं मधुराक्षरम् ॥३१॥

निरीक्षमाणा भर्तारं सर्वावस्थमनिन्दिता ।

मृतमेव हि तं मेने काले मुनिवचो स्मरन् ॥३२॥

अनुवर्तती तु भर्तारं जगाम मृदुगामिनी ।

द्विधेव हृदयं कृत्वा तं च कालमवेक्षती ॥३३॥